# Sita Lahari

# સીતાલહરી

## Document Information

Text title : Sita Lahari

File name : sItAlaharI.itx

Category : devii, laharI

Location : doc_devii

Author : Kavimani Subrahmanyashastri

Proofread by : Aruna Narayanan

Description/comments : Ramastutimanjari page 498

Latest update : June 3, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 3, 2023

*sanskritdocuments.org*

# Sita Lahari

## સીતાલહરી

શ્રિયં લબ્ધું નિત્યાં સકલભુવનેશૈરપિ નુતાં
　　શ્રિતાનાં સંસારામ્બુધિતરણનૌતુલ્યચરણામ્ ।
શ્રિયઃ પત્યુઃ કાન્તાં દશરથસુતત્વં ગતવતઃ
　　શ્રિયં વન્દે મન્દેતરમહિમમાન્યાં જનકજામ્ ॥ ૧॥

વરં લબ્ધ્વાઽપ્યન્યાદૃશમહિમવાગ્ગુમ્ભનવિધૌ
　　વિધેર્વાલ્મીકિશ્ચાપ્યપટુરભવદ્યસ્ય નવને ।
જડાનાં મૂર્દ્ધન્યો જનનિ તમિમં તે ગુણગણં
　　હઠાત્તુષ્ટૂષેઽહં લઘુ સફલયેસ્સાહસમિદમ્ ॥ ૨॥

વિનિન્દન્ત્વિષ્ટા મામલમુપહસન્તુ જ્ઞાનિવહાઃ
　　અવજ્ઞાં વા કુર્વન્ત્વવનિતનયે કાવ્યરસિકાઃ ।
સ્તુતૌ તે નો ગર્વાદપિ તુ જનિસાફલ્યકૃતયે
　　પ્રવૃત્તિર્જાતેયં મમ દુરપનોદ્યા કથમપિ ॥ ૩॥

ન વિદ્યાનૈપુણ્યં ન ચ કુશલતા વાઙ્મુખવિધૌ
　　ન વા શિલ્પજ્ઞાનં ભવતિ મમ નો યુક્તિપટુતા ।
કથં વા રક્ષેયુર્જગતિ ધનિનો માં ગુણદૃશઃ
　　ત્વમેવૈકા જાગર્ષ્યગતિકગતિત્વેન જનનિ ॥ ૪॥

શપન્તં ઘ્નન્તં વા તનયમકૃતજ્ઞં નિકટગં
　　ન તચ્ચિત્રં માતા યદવતિ સદા વત્સલતયા ।
ઇદં ચિત્રં મન્યે પરમવિમુખં મન્તુભરિતં
　　ત્વમાધાવન્તી મામનુપદમવસ્યમ્બ યદહો ॥ ૫॥

મનઃ કામક્રોધાદ્યભિભવમહાતઙ્કકલુષં
　　ન તે પાદામ્ભોજં ક્ષણમપિ નિષેવ્યં કલયતે ।
સુખં યોગક્ષેમં વહસિ ખલુ નિત્યં મમ તથા-
　　ઽપ્યપૂર્વોઽયં માર્ગો જનનિ તવ મદ્રક્ષણવિધૌ ॥ ૬॥

ત્વદન્યે યે દેવા નિજચરણભક્તૈકસદયાઃ
　　અપિ સ્મર્તું તેષાં ન સરતિ મનો મે કથમપિ ।
અવાગ્ગમ્યાં હિંસાં તવ કૃતવતી રાક્ષસવધૂઃ
　　ત્વમેકા મે સેવ્યા પવનતનયાદ્રક્ષિતવતી ॥ ૭॥

અસાધૂનાં દુઃખં યદિ નિજકૃતં ભુઞ્જત ઇતિ
　　પ્રવાદોઽયં, સન્તઃ કતિ કતિ ન દૃષ્ટા બહુશુચઃ ।
દયન્તે સાધૂનામપિ તુ કૃતિનો નૈવમસતાં
　　નતં તે પાદાબ્જે તદિહ કુરુ માં સત્સુ જનનિ ॥ ૮॥

નિયન્તા લોકાનાં નિગમવચસાં તત્ત્વમપિ સઃ
　　ત્વયા યુક્તો મોદં ભવનવનયોસ્તે પતિરગાત્ ।
વિયોગાત્તે કષ્ટં સમભજત વાચામવિષયં
　　મુદં સાન્નિદ્ધ્યં તે દિશતિ તદભાવશ્શુચમપિ ॥ ૯॥

અમન્દૈરાનન્દૈર્ઘનવિલસિતૈસ્તુન્દિલહૃદાં
　　સમીપે ધન્યાનામનૃતવિષયૈરમ્બ નવનૈઃ ।
કૃતઃ કાલક્ષેપસ્તવ પદયુગં તૂજ્ઝિતમભૂત્
　　ક્ષમસ્વેદાનીં ત્વં હૃદુપગમિતા પાહિ દયયા ॥ ૧૦॥

દુરન્નૈર્દુષ્ટા મે દશમુખરિપુપ્રેયસિ તનુઃ
　　મનઃ કામક્રોધાદિભિરપિ હતં વાક્ચ નૃનવૈઃ ।
ફલં તસ્માન્ન સ્યાત્ત્રિવિધકરણૈરમ્બ કરણૈઃ
　　સુખં પ્રાપ્તું પન્થા મમ તવ વિના દેવિ કરુણામ્ ॥ ૧૧॥

કૃતાગસ્કત્વં મે ભવતુ ન ચ કાકાદવરતા
　　ન રક્ષઃસ્ત્રીભ્યો વા જનનિ મમ દુષ્ટત્વમધિકમ્ ।
કુતો રક્ષાહેતોશ્ચિરમધિકચિન્તાં કલયસે
　　વરે દીનાનાં મય્યપિ કિર કટાક્ષં સકરુણમ્ ॥ ૧૨॥

અનાગસ્કં પ્રાપ્તં શરણવદમેકં નિશિચરં
　　પતિસ્તે મન્ત્રીન્દ્રૈઃ કૃતવિપુલમન્ત્રશ્ચિરમપાત્ ।
કૃતાગસ્કં મૃત્યોરિવ હનુમતો ભીતિભરિતં
　　ગણં રક્ષઃસ્ત્રીણાં ધરણિતનયે ત્વં સ્વયમપાઃ ॥ ૧૩॥

સમસ્કાર્ષીત્કકું પ્રભુરપિ પતિસ્તે તવ કૃતે

તતારામ્ભોરાશિં સુહૃદમપિ શાખામૃગમધાત્ ।
અહો માદૃક્ષાણાં પરમસુલભાઽસિ શ્રિતવતાં
શિશૂનાં સૌલભ્યં ભવતિ હિ સવિત્ર્યા અનુપમમ્ ॥ ૧૪॥

દધાના સીતેઽબ્જં કરસરસિજે, કાઞ્ચનમયં
વસાના વાસસ્ત્વં વરમણિવિભૂષાઙ્કિતતનુઃ ।
દૃશં વિન્યસ્યન્તી મયિ સકરુણાં સસ્મિતમુખી
પ્રિયોત્સઙ્ગાસીના નયનપથગા સ્યા મમ કદા ॥ ૧૫॥

તરુત્વં ગ્રાવત્વં મૃગપતગભાવં ચ ગમિતૈઃ
કથઞ્ચિજ્જીવૈસ્તે કુહચિદુપયોગશ્ચ ભવતિ ।
નરત્વં તત્રાપિ દ્વિજનરજનુષ્ટ્વં ગતવતા
વિવેકિત્વાભાવાજ્જનનિ ન મયાઽર્થોઽસ્ત્યણુરપિ ॥ ૧૬॥

કૃતં કામાત્ ક્રોધાદ્દ્રવિણલવલોભાચ્ચ દુરિતં
મનઃ કમ્પં ધત્તે નરકગતિમુત્પ્રેક્ષ્ય નિયતામ્ ।
ન મે પ્રાયશ્ચિત્તં કથયિતુમલં શાસ્ત્રનિવહાઃ
તવાઙ્ઘ્રી સેવે તજ્જનનિ મુનિચિત્તૈકસદનૌ ॥ ૧૭॥

જનિત્વા ભૂલોકે જનનિ પરિભોક્તું સ્વદુરિતં
વિયોગાદ્બન્ધૂનાં વિષસમનિરર્થભ્રમણતઃ ।
સદા દારિદ્ર્યેણાપ્યનિશમનુતપ્તાંશ્ચ મનુજાન્
અપાઙ્ગૈશ્ચેત્પશ્યેરમૃતસહજે તે ક્ષયતિ કિમ્ ॥ ૧૮॥

ચિરં યુદ્ધ્વા શ્રાન્તોઽપ્યથ ચ વિનિકૃત્તચ્છદપદો
વમન્ વક્ત્રાદ્રક્તં જિગમિષુરપિ પ્રેતપદવીમ્ ।
જટાયુર્દદ્ધ્રેઽસૂન્ રઘુતનયયાનાવધિ હિ યત્
સ એષ પ્રત્યક્ષો જનનિ તવ સંસ્પર્શમહિમા ॥ ૧૯॥

ચલચ્છમ્પાતુલ્યાં ચપલનયનાં ચારુગમનાં
દશાસ્યો દૃષ્ટ્વા ત્વાં દમિતભુવનોઽપિ સ્મરવશઃ ।
મદાન્મત્વા ભોગ્યાં વિપદમતુલાં માતરગમત્
તદીયભ્રાતાઽગાત્ સુખમખિલમાતેતિ કલયન્ ॥ ૨૦॥

યદિ દ્રષ્ટું સાક્ષાજ્જનનિ ભવતીં સુસ્મિતવતીં
અહં પ્રત્યૂહી સ્યામનુપમકૃપે દુષ્કૃતચયૈઃ ।
અપિ સ્વપ્ને દૃશ્યા ભવ મકુટકેયૂરસુભગા

ચિરાદાશામેતાં ચિનુહિ પરિપૂર્ણાં કથમપિ ॥ ૨૧॥

મહાન્ માનો યો માં નમયતિ ન કસ્યાપિ પુરતો
ન તં નાદાન્તસ્થે શ્લથય કરવૈ તે તુ વિનતીઃ ।
દયાં યદ્યાદદ્ધ્યા ઇતરમથ બુદ્ધ્યા ન કલયૈ
વશસ્થે ક્ષીરોદે જનનિ ગણયેદ્રોપમિહ કઃ ॥ ૨૨॥

ચતુર્ભિઃ કિં વેદૈર્વિદિતપરમાર્થૈરપિ ભૃશં
સમસ્તૈર્વા શાસ્ત્રૈસ્સદસિ પરવાઙ્મુદ્રણચણૈઃ ।
નિષેવે ત્વાં લબ્ધું સતતમિહ ચામુત્ર ચ સુખં
હનૂમન્તં દૃષ્ટ્વા મમ મતિરિયં માતરુદિતા ॥ ૨૩॥

સકૃન્નત્વા મર્ત્યો જનનિ પદપદ્મં તવ સુખી-
ત્યનુક્રોશન્ત્યાર્યા વિદિતનિગમાન્તાર્થગતયઃ ।
નમામ્યઙ્ઘ્રી નિત્યં નતબુધજને તે યતમનાઃ
ન મે શાન્તં દુઃખં તદપિ વદ હેતું વરગુણે ॥ ૨૪॥

તવ પ્રારબ્ધં ત્વં હ્યનુભવસિ તન્નાશનવિધૌ
ન શક્તઃ કોઽપીતિ પ્રતિવચનમમ્બાર્પયસિ ચેત્ ।
ભવેદ્વ્યર્થા સેવા તવ ચરણયોર્મે કિલ તદા
યતો મે પાપાનાં ન ચ પરમિયત્તા ફલવતામ્ ॥ ૨૫॥

વિશુદ્ધં વિજ્ઞાનં સહજમિહ વિપ્રાન્વયજુષાં
રણોત્કર્ષો રક્ષોઽન્તકગૃહિણિ રાજ્ઞાં ચ સહભૂઃ ।
દ્વિજસ્સન્ લજ્જેઽહં ભુવિ કથયિતું મૂઢ ઇતિ માં
તમોહન્ત્ર્યા દૃષ્ટ્યા તરણિકુલભૂષે સ્નપય મામ્ ॥ ૨૬॥

કટાક્ષાસ્તે કામાન્ દદતિ કરુણાપૂરકલિતાઃ
ત એતે લભ્યાસ્સ્યુસ્સકૃદપિ પદોસ્તે પ્રણમનાત્ ।
ઉપેક્ષા ચેદત્રાપિ ચ ન કિમિવ કુર્યાસ્ત્વમનઘે
ફલં રસ્યં વૃક્ષા અપિ દદતિ પાદાશ્રયવતે ॥ ૨૭॥

મુનીન્ દેવાન્ પ્રાજ્ઞાનવસિ યદિ કસ્તેન ગરિમા
સ્વયં તે સમ્પ્રાપ્તાસ્ત્વદવનદશાં સ્વૈઃ પ્રયતનૈઃ ।
અમૂદૃક્ષં કઞ્ચિદ્ગતિવિકલમજ્ઞાતસુકૃતં
સ્વયં રક્ષિત્વાઽમ્બ પ્રથય કરુણાં તે ત્રિભુવને ॥ ૨૮॥

પ્રચારો યાવાન્ મે પ્રતિધનિકગેહં પ્રકલિતઃ
તદર્ધં તે દિવ્યાલયમનુ સમાધાસ્યમિહ ચેત્ ।
પ્રસન્ના ત્વં માતર્નિયતમભવિષ્યો મમ દૃઢં
દશામેતાં નાવાપ્સ્યમપિ દયિતે દૂષણરિપોઃ ॥ ૨૯॥

ખલાનાં ધુર્યાય સ્વરદિત વિરાધાય ભવતી
મહામન્તું કૃત્વા મઘવતનયસ્તે સુખમગાત્ ।
અમૂદૃક્ષાં જ્ઞાત્વા જનનિ કરુણાં તે નિરુપમાં
મનો મે નો સેવાકરણવિધયેઽન્યં મૃગયતે ॥ ૩૦॥

ન લભ્યો યોગો મે હ્યવિજિતમરુત્ત્વાદવનિજે
ન ચ દ્રવ્યાલાભાજ્જનનિ તવ પૂજાઽપિ સુકરા ।
બ્રવીમિ ત્વન્નામાન્યવનિતનયે રામદયિતે
જગન્માતર્દેવીત્યવ સુકૃતતોઽસ્માદપિ ચ મામ્ ॥ ૩૧॥

જગજ્જન્મસ્થેમપ્રળયકરણેચ્છે જનકજે
જરામૃત્યુવ્યાધિપ્રતિભયભવાન્તાઙ્ઘ્રિનમને ।
જયખ્યાતે દાનૈર્જિતસુરતરો જઙ્ગમસુધે ।
જડાનામગ્ર્યં માં જય જય નયન્તી નિજપદમ્ ॥ ૩૨॥

મનસ્તે પાદાબ્જે ચરતુ મહનીયે મમ સતાં
ચરિત્રં વાઙ્નિત્યં પઠતુ તવ રામાયણમપિ ।
કરો મે શીર્ષે તે સતતમપિ પુષ્પાઞ્જલિકિરઃ
પ્રસીદેમં દાતું વરમપિ ચ વાલ્મીકિવિનુતે ॥ ૩૩॥

અનન્તાન્ મે મન્તૂનખિલભુવનેશો રઘુપતિઃ
કથં વા ક્ષામ્યેદિત્યતિશયિતભીતિસ્તવ પદૌ ।
શ્રિતોઽસ્મિ ત્વં રક્ષિષ્યસિ નિયતમિત્યેવ દૃઢ઼ધીઃ
સવિત્ર્યા વાત્સલ્યં પિતુરધિકમમ્બાસ્તિ હિ શિશૌ ॥ ૩૪॥

અશિષ્ટઃ પાપાત્મા ન ખલુ દયનીયઃ કથમપી-
ત્યમૂં ચેત્ બુદ્ધિં ત્વં મદવનવિધૌ દેવિ કુરુષે ।
અનેકે માદૃક્ષા અપિ મદવરાસ્ત્વામધિગતાઃ
સુખં સમ્પ્રાપ્તા માં પરમિહ તુ મા માતરતિગાઃ ॥ ૩૫॥

વિરાધઃ સ્વઃ પ્રાપદ્વિહિતપરમાગાઃ સુરપતે-
સ્તનૂજો બ્રહ્માસ્ત્રાદપિ કિલ વિભોર્મુક્તિમગમત્ ।

દશાસ્યોઽપ્યુક્તોઽભૂત્ સુત ઇવ હિતં વત્સલતયા
તતો નિશ્ચેતવ્યાઽસ્યમિતકરુણેત્યેવ જનનિ ॥ ૩૬॥

ન વૈકુણ્ઠં યાચે ન ચ વિધિપદં નાપિ ચ દિવં
ન વા ભૂપત્વાય સ્પૃહયતિ મનો મે કથમપિ ।
કટાક્ષં તે માતઃ કલય કરુણાર્દ્રં મયિ પરં
વિધત્સે ચોપેક્ષામિહ ચ યદિ કિં નામ કરવૈ ॥ ૩૭॥

પિશાચ્યા તૃષ્ણાખ્યાં સમધિગતયા ભ્રાન્તમનસા
નિષેવ્યાસેવ્યાનપ્યહહ જનનીં વિસ્મૃતવતા ।
મયા કો વા ધર્મો ભવતુ ફલદાનાય રચિતો
વિનષ્ટે મૂલે કિં ભવતિ ફલપુષ્પાદિગરિમા ॥ ૩૮॥

અરિં તે હન્તું ત્વામપિ સમધિગન્તું કૃતમતૌ
વિભૌ સિન્ધુર્નૈસર્ગિકમપિ ચલત્વં સમજહાત્ ।
અપિ ગ્રાવાણઃ સ્વં જનનિ વિજહુર્ગૌરવગુણં
ગિરાં પારે દૂરે જયતિ તવ માહાત્મ્યગરિમા ॥ ૩૯॥

અશુદ્ધઃ શુદ્ધો વા જઠરપરિપૂર્તિં વિરચયન્
અયાચ્યાન્ યાચિત્વા મમ જનનિ માનં ચ ગળયન્ ।
અપિ સ્વપ્ને સત્તાં તવ ન કલયન્ સન્તતમતન્
વિના તે કારુણ્યં સુખમિહ પરત્રાપિ કિમિયામ્ ॥ ૪૦॥

તરેદમ્ભોરાશિં ગિરિમપિ હરેદેકકરતો
વ્રજેદ્દૂરે વ્યોમાધ્વનિ ચ લભતાં ગિર્યતિથિતામ્ ।
બહૂનેકો હન્યાદમિતબલયુક્તાનપિ રિપૂન્
સમસ્તોઽયં માતસ્તવ ચરણદાસ્યસ્ય મહિમા ॥ ૪૧॥

મયિ ક્રીડાલોલે મનુકુલશુભાદૃષ્ટસરણે
કૃતાન્તં વિસ્મૃત્ય પ્રચરતિ યથેચ્છં હતમતૌ ।
વિના ત્વાં ક્ષેમં મે જનનિ ભુવને ચિન્તયતુ કઃ
શિશૂન્માતૈવૈકા સુપથિ કુરુતે ખલ્વપથગાન્ ॥ ૪૨॥

દયન્તે ન શ્રોતું કતિ, કતિ નિશમ્યાપ્યવચસઃ
તિરસ્કુર્વન્ત્યેકે મમ હિ વિભવો દૈન્યવિભવમ્ ।
અતો નિર્વિણ્ણોઽહં જનનિ તવ પાદાન્તિકમગાં
સ્વયં જ્ઞાત્વા દૈન્યં લઘુ મમ વિદધ્યા યદુચિતમ્ ॥ ૪૩॥

વિદિત્વા વાલ્મીકિર્વિધિવિનુતપાદે વચનતો
　　દયાં નિસ્સીમાં તે ત્વયિ પરિગતેનાર્થિપદવીમ્ ।
મયા દુઃખામ્ભોધૌ મહિતનુભવે લુઠ્યત ઇતિ
　　શ્રુતં યાવન્નાન્યૈરવતુ ભવતી તાવદિહ મામ્ ॥ ૪૪॥

પ્રબુદ્ધ્યેતાતોદ્યૈ રુચિરતરનાદૈઃ પ્રતિદિનં
　　પ્રજલ્પેદ્ભૃત્યાનાં ધુરિ ચ ગિરમાજ્ઞાપનમયીમ્ ।
રથૈર્વા ઘોટૈર્વા ગજપરિબૃઢૈર્વા બહિરિયાત્
　　ય આસીત્તે દૃષ્ટેર્જનનિ સકૃદપ્યધ્વનિ પુમાન્ ॥ ૪૫॥

દરિદ્રો વાઽઽઢ્યો વા ભવતુ ભવતાપપ્રશમનિ
　　ત્વદીયાઙ્ઘ્રૌ નમ્રસ્તવ ચરિતપીયૂષસુહિતઃ ।
ય આસ્તે તસ્યામું કુરુ સહચરં જાનકિ જનં
　　ધનાઢ્યૈસ્સંવાસાત્સુવિદિતસુખં નાસ્તિકવરૈઃ ॥ ૪૬॥

ક્ષણાલ્લોકાન્ સર્વાનટિતુમતિશક્તં પવનજં
　　ન્યધાસ્ત્વં દાસ્યાર્થં ક્ષિતિપતિસુતા રાજમહિષી ।
કપીન્દ્રો રક્ષોરાડપિ તવ પદાબ્જૈકશરણૌ
　　જનોઽયં શુશ્રૂષાં તવ જનનિ કાં વા રચયતામ્ ॥ ૪૭॥

પદોર્નત્યા શ્રુત્યા તવ ચ ચરિતસ્યામૃતજિતો
　　ગુણસ્તુત્યા દૈન્યં ગતવતિ દયાં નૈવ કુરુષે ।
હતાઽસિ ત્વાં ખાદામ્યલમિતિ ગદિત્વા જનનિ તે
　　વધાયોદ્યુક્તાનાં પ્રથયસિ કૃપાં તે નિરુપધિમ્ ॥ ૪૮॥

મનોસ્તે માન્યાઙ્ઘ્રે તવ જનક એવૈષ જનકો
　　બભૂવર્ષિર્મૈત્રાવરુણિરુપદેષ્ટાઽસ્ય મુનિરાટ્ ।
સ પુત્રીમારાદ્ધ્યાં જનનિ જનકસ્તે સ્મ મનુતે
　　ન જાને માદૃક્ષૈસ્ત્વયિ કથમુ ભાવ્યં કથય મે ॥ ૪૯॥

પ્રવાળાત્ પુષ્પાદ્વા તવ પદયુગં કોમળતરં
　　નિધેહીત્યાખ્યાતું મમ મનસિ જિહ્રેમિ કઠિને ।
પુનશ્ચિન્તાઽભૂન્મે ગિરિશધનુરારોપણપણે
　　ન કિં ભ્રાન્તાઽસિ ત્વં વન ઇતિ તતો યામિ ચ ધૃતિમ્ ॥ ૫૦॥

મનઃ કમ્પં ધત્તે મહિતમહિળાજન્મસુભગે

કૃતં પાપં સ્મૃત્વા કૃતદુરિતિશિક્ષસ્તવ પતિઃ ।
રહો બ્રૂયા નાથં જનનિ મમ મુક્તિં પ્રતિ વચઃ
સ નૂનં શ્રદ્ધાળુસ્તવ વચસિ માયામૃગવધાત્ ॥ ૫૧॥

ન શબ્દાઃ પુષ્ટાર્થા વિલસતિ ન ચાલઙ્કૃતિગણઃ
રસો વા નો કશ્ચિજ્જનનિ ન ચમત્કારિ ચ વચઃ ।
તથાઽપિ શ્રુત્વા મત્પ્રલપિતમિદં સ્નિહ્ય પરમં
હૃદબ્જં માતૄણાં વિકસતિ શિશૂનાં હિ વચનૈઃ ॥ ૫૨॥

ઇતિ શ્રીવલઙ્ગિમાન્ ગ્રામાભિજનેન શાસ્ત્રરત્નાકર શ્રીસ્વામિશાસ્ત્રિણાં
પ્રિયાન્તેવાસિના "કવિમણિ, કવિતલ્લજ" બિરુદભાજા
પણ્ડિત સુબ્રહ્મણ્યશાસ્ત્રિણા પ્રણીતા સીતાલહરી સમાપ્તા ॥

Proofread by Aruna Narayanan

*Sita Lahari*
pdf was typeset on June 3, 2023

Please send corrections to *sanskrit@cheerful.com*